International Journal of Sanskrit Research 2021; 7(1): 246-249

International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2021; 7(1): 246-249
© 2021 IJSR
www.anantaajournal.com
Received: 07-11-2020
Accepted: 15-12-2020

**Biswajit Roy**
Research Scholar, Seacom Skills University, Kolkata, West Bengal, India

**Dr. Anjalika Mukhopadhay**
Research Supervisor, Seacom Skills University, Kolkata, West Bengal, India

**Corresponding Author:**
**Biswajit Roy**
Research Scholar, Seacom Skills University, Kolkata, West Bengal, India

# आधुनिक कालस्य दूतकाव्यम्

**Biswajit Roy and Dr. Anjalika Mukhopadhay**

**DOI:** https://doi.org/10.22271/23947519.2021.v7.i1e.1307

**प्रस्तावना**

लौकिक श्रव्यकाव्यस्य परम्परायां दूतकाव्यम् अन्यतमम् उपादानं भवति। दूतेन सन्देश प्रेरणं सुप्राचीनभारतीयसाहित्ये न तावद् विरलमति दर्शनम्। ऋग्वेदस्य श्यावाश्वकथायां दूतविषयककाव्यस्य उपादानम् अस्ति। ऋग्वेदे यजमानः अग्निसूक्ते अग्निना देवानां सविधे स्वीयां प्रार्थनां प्रेरयति। 'सरमा पनि' इति संवादसूक्ते सरमा दूतरूपेण परिचितः। रामायणे पवनपुत्रः हनुमान् श्रीरामस्य वार्ताम् आदाय लङ्कां गतवान्। महाभारते श्रीकृष्णः पाण्डवानां सन्देशम् आदाय हस्तिनापुरं गतवान्। 'नल-दमयन्ती'आख्याने हंसः दौत्यकार्यं करोति। ईदृशं दौत्यकर्म मनसि निधाय कालिदासः मेघदूताख्यं दूतकाव्यम् अरचयत्। परवर्तीकाले वहवः कवयः मेघदूतस्य वर्णनारीतिम् आश्रित्य बहूनि दूतकाव्यानि विरचितवन्तः। तेषु कतिपयानि दूतकाव्यानि आलोच्यते।

**पवनदूतम्** - द्वादश शतके वांलादेशे रचितेषु दूतकाव्येषु प्राचीनतमं निदर्शनम् 'पवनदूतम्' इति दूतकाव्यम्। कविवरेण धोयिना 'पवनदूतम्' काव्यम् विरचति। कविः धोयी वङ्गाधिपतिलक्ष्मणसेनस्य सभापण्डितः आसीत्। अस्य काव्यस्य नायिका गन्धर्वकन्या कुवलयवती काव्यस्य नायकः बङ्गाधिपतिलक्ष्मणसेनः। धोयी'कविराज'इति पदेन भूषितः। अस्मिन् दूतकाव्ये चत्वारः अधिकं शतकं श्लोकाः सन्ति। पवनदूते पवनः कुवलयवत्याः प्रेमवार्ताम् आदाय विजयनगरम् गतवान् वार्तां चोक्तवान्। कविना उक्तः ग्रन्थशेषे -

"दण्डिव्यूहं कनकलतिकां चामरं हैमदण्डं
यो गौडेन्द्रादलभत कविक्ष्माभृतां चक्रवर्ती।
श्री धोयीकः सकलरसिकप्रीति हेतोर्मनस्वी
काव्यं सारस्वतमिव महामन्त्रमेतज्जगाद ।।"

**चन्द्रदूतम्** - सप्तदश शतके'मैमनसिंह'इति प्रख्यातस्थाने श्रीकृष्णतर्कालंकारः अजायत। तेन'चन्द्रदूतम्'इदम् काव्य प्रणीतम्। वासुदेवं प्रणम्य श्रीकृष्णतर्कालंकारेण चन्द्रदूतम् काव्यमिदं सूच्यते। चन्द्रदुतस्य आदौ 'ओं नमो गणेशाय' कविना उक्तः। सर्वे श्लोकाः मन्दाक्रान्ता छन्दसा विरचिताः। अस्मिन् दूतकाव्ये द्विपञ्चाशत् संख्यकाः श्लोकाः सन्ति। रामायणे दृश्यते यत् लङ्कायाः पवनपुत्रः हनुमान् रामवार्ताम् जानकीसकाशम् नयति हनुमत्ता जानकी-वार्तानयनाद् अनन्तरं दशरथनन्दनः रामचन्द्रः पुनः दूतमखेन चन्द्रं प्रेरयति जानकी समीपम्।

अस्मिन् दूतकाव्ये इदं वृत्तान्तं समुपलभ्यते। श्रीकृष्णतर्कालंकारः न्यायदर्शने सुपण्डितः आसीत्। प्रथमश्लोके कविः वदति -

“रामो रामाभिरामे रमितकरभवैरात्मरामाभिराम
सुप्तो मोमुह्यमानो झटिति वियति तं वीक्ष्य चन्द्रं तदीये।
सूरोऽयं वा स्मरो वा स्मरोरिपूरपि वा स्वर्मनिर्वा विभाति
प्राणेशीवक्रचन्द्रः किमु गगन चरस्तर्कयामास चैतत्।।
(१/१)

**कोकिलदूतम्** - १८७५ ईशबीयाब्दे अस्य दूतकाव्यस्य रचयिता हरिमोहनः प्रामाणिकः। अस्मिन् दूतकाव्ये शतं श्लोकाः सन्ति। श्लोकाः अस्मिन् काव्ये पिकः दौत्यकार्यं करोति। तदा श्रीकृष्णः मथुरानगरे वसति। प्रेम कातरा राधा कृष्ण-समीपं वार्ता प्रेरणार्थं पिकं प्रेरयति। राधा कृष्णयोः चिरन्तरं विषयकं वृत्तान्तमत्र लभ्यते।

**काकदूतम्** - कविः गौरगोपालः काव्यमिदम् अरचत्। तस्य पितृदेवः दीनबन्धुमुखोपाध्यायः। १८११ शकाब्दे काव्यमिदं नवनवतिश्लोकैः प्रथितम्। अस्मिन् काव्ये काकः दौत्यकार्यं करोति। विरह विधुरया राधया कृष्णानयनाय दूतरूपेण काकः नियुज्यते। इदम् वृत्तान्तपुराणे प्राप्यते। कविः गौरगोपालः इमां घटनां नवसौकार्येन वर्णयति। काकदर्शने राधायाः मनसि संशयः जातः।

“काकदरो यादृश एव जन्तोः काकध्वजो वा
जलसम्भवस्य। काकोलरूपः किमु नाशकोऽत्र
काकोऽयमागान्मम् सन्निधाने।।"

**कीरदूतम्** - अष्टादश शतके अस्य ग्रन्थस्य कर्ता रामगोपालः महाशयः। अस्मिन् दूतकाव्ये चत्वारः अधिकं शतकं श्लोकाः सन्ति। अस्मिन् काव्ये कीरः दौत्यकार्यं करोति। काव्ये कृष्णसन्निधानेन वनवासिसोपिनीनां कीरदूतेण दिव्यवार्ताप्रेरणम् इति कथावस्तु वर्णितम्।

**उद्धवदूतम्** - ऊनविंशशताब्द्याः प्रथमभासे माधवकवीन्द्रभट्टाचार्येण भागवताख्यानम् अवलम्ब्य इदं दूतकाव्यं विरचितम्। काव्ये अस्मिन् १४१ श्लोकाः सन्ति। तालितनगरस्य नागरिकः माधवः कवीन्द्रः भट्टाचार्यः आसीत्। अस्मिन् काव्ये उद्धवः दौत्यकार्यं करोति। काव्ये दुतमुखेन श्रीकृष्णं निकषा उद्धवं प्रतिवार्ताप्रेरणम् एव उद्धवदूतस्य विषयः।

**वकदूतम्** - १९१९ ईशबीयाब्दे अस्य दूतकाव्यस्य रचयिता अजितनाथन्यायरत्नमहाशयः। कविः नवद्बीपनगरे जातः। तस्य पितृदेवः राधाकृष्णः भट्टाचार्यः आसीत्। वैष्णवेतरेषु दूतकाव्येषु अन्यतमं वकदूतम्। १८३९ ईशबीयाब्दे तस्य शुभाविर्भावः अभवत्। 'वकः' अस्य काव्यस्य दूतरूपेण परिचितः। विरहिनी मधुकरी प्रियतममधुकरस्य अन्वेषणाय। दूतमुखेन वकं प्रेरयति। असमाप्तं काव्यमिदम्। अस्य काव्यस्य अध्यायाः सर्गेण अभिहिता सन्ति। कविना उक्तः -

“अजितनाथनिजाननकाननाद् उदलसत् कविता कुसुमावली।
इह न चास्ति रसे न च सौष्ठवं भवति येन शचीसुत ते
रतिः।।"

**पान्थदूतम्** - १९४९ ईशबीयाब्दे नदीयावासिना भोलानाथेन 'पान्थदूतम्' कृतम्। पान्थदूतकाव्ये पञ्च अधिकं शतं श्लोकाः सन्ति। 'शार्दूलविक्रीडितम्' इति छन्दसा इदं काव्यं विरचितम्। अस्मिन् काव्ये पान्थः दौत्यकार्यं करोति। राधा कृष्णयोः शाश्वतं प्रणयविषयकं करुणरसभूतं काव्येकं पान्थदूतम्। अत्र दृश्यते विरहिनी गोपी यमुना तीरे मूर्च्छां गता। संज्ञं प्राप्य गोपी मथुरानगरम् उद्दिश्य गम्यमानं पान्थमेकं लब्धाः। तं दूतरूपेण प्रेषयति कृष्णसकाशे -

“काचित् क्वापि दिने दिवाकरसूताकूले सखीभिः
सम्यं । प्रत्युषे विरहग्रहग्रहणतो वैराग्यमाप्ताऽथ सा।
कृष्णं तज्जलनीलपेशलतनुं मृत्वाऽपतन्मूर्च्छिता
दुतीदत्तजलैर्विवध्य मथुरापान्थं कमुचे वचः ।।"

**मेघदूतम्** - १९७२ ईशबीयाब्दे आधुनिकसंस्कृत कविषु वीरेन्द्रकुमारभट्टाचार्यः अन्यतमः। वीरेन्द्रकुमारभट्टाचार्यः आधुनिकसंस्कृत साहित्ये 'सनेट्' इति पद्यप्रकारस्य प्रवर्तकः मन्यते। अस्मिन् काव्ये कविः कालिदासः यक्षरूपेण, कविप्रियां यक्षजायारूपेण, अवन्तीम् अलंकाररूपेण अङ्किताः। वीरेन्द्रकुमारभट्टाचार्यस्य इयं कल्पना रचनानैपुन्येन वास्तवरूपेण प्रतिभाति। यथा -

"कथं न्वेकदा विक्रमार्को नृपो मन्युमूढो हि जातो
विना कारणं स्वाधिकारोश्लथं मन्यते कालिदासम्।
स हित्वा प्रियां राजधान्यां तदा दूरशैलं प्रयात
श्चकारोर्जितं रामगिर्याश्रम्यं वर्षभोग्यं स्ववासम्।।"

**मित्रदूतम्** - १९९० ईशबीयाब्दे कविः इच्छारामः द्विवेदी(प्रणवः) 'मित्रदूतम्' व्यरचत्। अस्मिन् दूतकाव्ये पत्रम् दौत्यकार्य्यं

करोति। कविः पत्रदूतेन भ्रमण-वृतान्तं ज्ञापयति बान्धवम्। काव्यस्य निदर्शनमात्रम् -

"याच्ञा मोघा भवति सुजने नाधामो स कदाचिद्।"

एतानि काव्यानि व्यतिरिक्तानि 'नार्मो वयं नवयुगस्य', 'घोरमेघोदयकाव्यम्', 'संस्कृतरवीन्द्रसंगीतम्', प्रभृतानि काव्यानि अपि उल्लेखयोग्यानि। रवीन्द्रनाथस्य 'निर्झरेर स्वप्नभङ्ग' इति वङ्गकवितानुदिता कालीपदतर्काचार्येण -

"ईहाद्य प्रभाते दिनेशस्य रश्मिः
कथ्यं मानसस्यान्तरं सं्प्रविष्टः।
कथ्यं प्राविशद्वा गृहायास्तमिते
विहगस्य गीतं नुतद्विस्किराणाम्।।"

**मेघदौत्यम्** - अस्या शताव्द्याः इदं दूतकाव्यं कविः त्रैलोक्य मोहन गुह महोदयेन विरचितम् । 'मेघदौत्यम्' काव्ये पूर्वमेघः उत्तरमेघश्च इति मण्डद्वयं प्राप्यते। पूर्वमेघे चतुः षष्ठी श्लोकाः सन्ति। उत्तरमेघे एकविंशति अधिकं शतं श्लोकाः सन्ति। मन्दाक्रान्ता छन्दसा 'मेघदौत्यम्' काव्यस्य सर्वे श्लोकाः विरचिताः। सरस्वतीं प्रणत्य कविः मेघदौत्यम् सूचयति। यथा - ' अमरत्वप्रदात्रीं वाणीं प्रति प्रणतिः' । कालिदासेन यत्र मेघदूत्यं समाप्यते तस्मात् 'मेघदौत्यम्' इदं प्रारभ्यते। त्रैलोक्य मोहन गुह महोदयेन उक्तः -

"अस्मिपार्थी रचयितुम् इदं मेघदूतम् अवशिष्टम्।"

यक्षेण प्रेरितं मेघं पुनः यक्षसमीपे प्रतिदूतरूपेण यक्षस्त्रियाः प्रेरणम् एव 'मेघदौत्यम्' इति काव्यस्य अस्य मूलविषयम्।

**शुकदूतम्** - अस्याः शताब्द्याः भट्टपल्लीनिवासिना वशिष्टवंशोद्भवेन यादबेन्द्रविद्यारत्नेन विरचितमिदम् दूतकाव्यम्। अस्मिन् दूतकाव्ये शुकः दुतरूपेण चित्रितः । कृष्णविरहवशाद् श्रीराधिकायाः मनोवेदनाया वाणीरूप्यं तावत् शुकदूतमिदम् -

"सन्तप्ताया दयिताविरहै राधिकाया विधाय
स्वनिर्देश्यं शिरसि सगुरो माधव्यं पण्डन्यं सन्।
गत्वा पश्यन् प्रमदवनभाक् श्रीहरिं वाक्यमेतद्
राधाप्रोक्तं स्वरचितमणि स्वादुवाक् प्राह नम्रः ।।"

**वाणीदूतम्** - २००८ ईशबीयाब्दे लक्षिकान्तपञ्चतीर्थेन रचितं 'वाणीदूतम्' अति उत्तमम् एकं दूतकाव्यम् । अमृतलोक साहित्यपरिषदः सप्तचत्वारिंशत् श्लोकिमन्वितं मन्दाक्रान्ता छन्दोबद्धम् वाणीदूतकाव्यम् प्रकाशितम्। अस्मिन् दूतकाव्ये कवेः लक्षीकान्तस्य आर्थिकदुरवस्थात् करुणार्ति ध्वन्यते। कतिपरायनां दुर्नीतिग्रस्थाणाम् शिक्षकानां चक्रान्तेन रचयितुः सर्वकारानुदानस्य रोधः अभवत्। तदा लक्ष्मीकान्त पञ्चतीर्थः वाणीं दूतरूपेण प्रेरयति एतत् अर्थं दूतकाव्यस्य नाम 'वाणीदूतम्' सार्थक्यं मन्यते। नीतिहीनाः नराः मेघाच्छनैः दिवसैः समानाः। अस्मिन् काव्ये कविना उक्तम् -

"दोषमन्या नकालधराछन्नरूपा दिनश्रीः।
कृत्या तेषामपि सुमहती राजत नैवपुन्या।।"

**विप्रसन्देशः** - २००६ ईशबीयाब्दे आचार्यः गोपालकृष्णेन विरचितं 'विप्रसन्देशः' अत्युत्तममेकं दूतकाव्यम्। २००६ ईशबीयाब्दे कर्णाटक प्रदेशात् गोपालकृष्णेन 'विप्रसन्देशः' इति दूतकाव्यम् विरचितम्। १६३ श्लोकाः मन्दाक्रान्ता छन्दसा विरचिताः भवन्ति। अत्र श्रीकृष्णमुद्दिश्य विरहसन्तप्ताया रुक्मिणीगोप्या विप्रेण सन्देशप्रेरणम् इति विषयः। काव्यस्य निदर्शनम् दीयते -

"भिन्नो मार्गो भुवनविदितो विप्रनासूचि यस्मात्।
चेदीशाद्याः पथि पथि परिचयाद् सीपितं स्फोटयेषुः।।"

एतानि काव्यानि व्यतिरिक्तानि 'नार्मो वयं नवयुगस्य', 'घोरमेघोदयकाव्यम्', 'संस्कृतरवीन्द्रसंगीतम्', प्रभृतानि काव्यानि अपि उल्लेखयोग्यानि। रवीन्द्रनाथस्य 'निर्झरेर स्वप्नभङ्ग' इति वङ्गकवितानुदिता कालीपदतर्काचार्येण -

ईहाद्य प्रभाते दिनेशस्य रश्मिः
कथ्यं मानसस्यान्तरं संप्रविष्टः।
कथ्यं प्राविशद्वा गृहायास्तमिते
विहगस्य गीतं नुतद्विस्किराणाम्॥"

संस्कृतसाहित्ये दूतकाव्यम् अत्यन्तं सुखपाठम् इति मन्यते। आधुनिके काले विरचितानि कतिपयानि दूतकाव्यानि आलोचितानि अत्र। एतद् व्यतिरिक्तानि कतिपयानि नामतः उल्लेख्यन्ते - मनोदूतम्, हंसदूतम्, उद्धवसन्देशम्, भ्रमरदूतम्, पिकदूतम्, पदाङ्कदूतम्, चन्द्रदूतम्, गोपीदूतम्, तुलसीदूतम्, अनिलदूतम्, पादपदूतम्, भक्तिदूतम् प्रभृतीनि इमाः कीर्तयः निःसंशयेन कालोत्तीर्णाः।

चुम्वकशब्दानि - दूतकाव्यम्, आधुनिककालः, विषयवैचित्र्यम्।

**वङ्गभाषानिबद्धाः सहायकग्रन्थग्रामाः**

1. चक्रवर्ती सञ्चिता - 'आधुनिक संस्कृत साहित्येर रूपरेखा', भट्टाचार्य अमलकुमार च, कोलकाता एम. एल. दे एनु कोम्पानि, एप्रिल-२०१३

2. चट्टोपाध्याय ऋता - आधुनिक संस्कृत साहित्य (१९१०-२०१०) छोटगल्प ओ नाटक कोलकाताः प्रग्रेसिभपावलिशासं एप्रिल-२०१२ (प्रथमसंस्करण).
3. दास करुणासिन्धु - संस्कृत साहित्येर इतिहास कोलकाताः पश्चिमबङ्ग वांला एकादेमि मार्च - २००८ (प्रथमसंस्करणम्) ।
4. वन्द्योपाध्यायः धीरेन्द्रनाथः - संस्कृत साहित्येर इतिहास पश्चिमबङ्ग राज्य पुस्तकपर्षद् अगस्त -२००९/सि (द्वितीयसंस्करणम्)
5. घोषाल वनविहारी - अवार्चीन संस्कृत साहित्येर इतिहास वइमेला २०१०
6. Chattopadhyay Rita. Mahamohopadhyaya Haridasa Sidhanavagisa: An Appraisal, Calcutta Sanskrit College 1974.
7. Krishnamachariar M. History of Classical Sanskrit Literature Madras: Motilal Banarasidass 1937.
8. Dutta, Kalikumar. Bengal's Contribution to Sanskrit Literature, Calcutta Sanskrit College 1974.
9. Mukhopadhyay Gobindogopal. A New Tri-Lingual Dictionary Sanskrit-Bengali-English. Kolkata Sanskrit Book Depot 2008.